# ॥ श्री कामाक्ष्यन्नपूर्णा गिरिजा दशकम् ॥

मन्दारकल्पहरिचन्दनपारिजात
मध्ये शशाङ्कमणिमण्टप वेदि संस्थे ।
अर्धेन्दुमौलि सुललाट षडर्धनेत्रे
भिक्षां प्रदेहि गिरिजे क्षुधिताय मह्यम् ॥१ ॥

केयूरहारकटकाङ्गदकर्णपूर
काञ्चीकलापमणिकान्तिलसद्दुकूले ।
दुग्धान्नपूर्णवरकाञ्चनदर्विहस्ते
भिक्षां प्रदेहि गिरिजे क्षुधिताय मह्यम् ॥२ ॥

लीलावचांसि तव देवि ऋगादिवेदाः
सृष्ट्यादिकर्मरचना भवदीय चेष्टाः ।
त्वत्तेजसा जगदिदं प्रतिभाति नित्यम्
भिक्षां प्रदेहि गिरिजे क्षुधिताय मह्यम् ॥३ ॥

अम्ब त्वदीयचरणाम्बुजसेवया ये
ब्रह्मादयोऽप्यविकलाश्रयमाश्रयन्ति ।

तस्मादहं तव नतोऽस्मि पदारविन्दम्
भिक्षां प्रदेहि गिरिजे क्षुधिताय मह्यम् ॥४ ॥

आलीकदम्बपरिसेवितपार्श्वभागे
शुक्रादयो मुकुळिताञ्चलयः पुरस्तात् ।
देवि त्वदीयचरणं शरणं प्रपद्ये
भिक्षां प्रदेहि गिरिजे क्षुधिताय मह्यम् ॥५ ॥

सद्भक्तिकल्पलतिके भुवनैकनाथे
भूतेशहृत्कमलमध्यनिवासभृङ्गे ।
कारुण्यपूर्णनयने किमुपेक्षसे माम्
भिक्षां प्रदेहि गिरिजे क्षुधिताय मह्यम् ॥६ ॥

सन्ध्यात्रये सकलभूसुरसेव्यमाने
स्वाहास्वधर्षिपितृदेवगणाः स्तुवन्ति ।
जाया सुताः परिजनातिथयोऽन्नकामा
भिक्षां प्रदेहि गिरिजे क्षुधिताय मह्यम् ॥७ ॥

गन्धर्वदेवमुनिनारदकौशिकात्रि

व्यासाम्बरीषकलशोद्भवकश्यपास्त्वाम् ।
भक्त्या स्तुवन्ति निगमागमसूक्तमन्त्रैः
भिक्षां प्रदेहि गिरिजे क्षुधिताय मह्यम् ॥८ ॥

एकाम्रमूलनिलयस्य महेश्वरस्य
प्राणेश्वरि प्रणतभक्तजनावनेक्षि ।
कामाक्षि रक्षितजगत्त्रितयेऽन्नपूर्णे
भिक्षां प्रदेहि गिरिजे क्षुधिताय मह्यम् ॥९ ॥

शब्दात्मिके शशिकलाभरणार्धदेहे
शम्भोरुरःस्थलनिकेतननित्यवासे ।
दारिद्र्यदुःखभयहारिणि का त्वदन्या
भिक्षां प्रदेहि गिरिजे क्षुधिताय मह्यम् ॥१० ॥

भक्त्या स्तुवन्ति गिरिजादशकं प्रभाते
पुत्रार्थिनोऽथ धनधान्यसमृद्धिकामाः ।
प्रीता महेशवनिता हिमशैलकन्या
तेषां ददतात्यसुलभान्यपि चेप्सितानि ॥११ ॥

Sri Kamakoti Mandali [srigurupaduka@yahoo.com]